International Journal of Sanskrit Research 2016; 2(4): 108-109

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4): 108-109
© 2016 IJSR
www.anantaajournal.com
Received: 11-05-2016
Accepted: 12-06-2016

डॉ. दोलामणि आर्य
सहायक प्राध्यापक, संस्कृत विभाग
लक्ष्मीबाई महाविद्यालय, दिल्ली
विश्वविद्यालय, दिल्ली, भारत।

Correspondence
डॉ. दोलामणि आर्य
सहायक प्राध्यापक, संस्कृत विभाग
लक्ष्मीबाई महाविद्यालय, दिल्ली
विश्वविद्यालय, दिल्ली, भारत।

# पाणिनीयव्याकरणे विकल्पव्यवस्था

डॉ. दोलामणि आर्य

## प्रस्तावना

सुविस्तृतायाम् आदिमायां लौकिकसंस्कृतभाषायां बाहुल्येन वैदिकसाहित्ये प्रयुज्यमानाः समस्ता अपि शब्दा आसन्। ''प्रयोगचोदनाभावादर्थैकत्वम्– विभागात्।''[1] इति जैमिनीयसूत्रस्य व्याख्यानसन्दर्भे शबरस्वामिना मतमेतत् सयुक्तिकं प्रदर्शितं यत्– ''य एव लौकिकास्त एव वैदिकास्त एव च तेषामर्थाः।'' लौकिकभाषा समयस्य प्रभावेन कालान्तरे शब्दार्थयोरुभयविधदृष्ट्या शनैः शनैः संकुचिता कालक्रमेण च प्रभाविता तथा एतावती संक्षिप्ता यत्–सा वैदिकभाषापेक्षया सर्वथा भिन्ना इव प्रतिभासिता। पाणिनेरष्टाध्याय्याः संरचना व्यावहारिकसंस्कृतभाषायाः प्रवृतेर्बहु पश्चाद् बभूव। पाणिनीयं तन्त्रं प्राधान्येन लौकिकभाषायाः व्याकरणमस्ति। तत्र सर्वत्र वैदिकपदानाम् अन्वाख्यानं लौकिकपदानाम् अन्वाख्यानाद् अनन्तरं विद्यते। वर्तमानसंस्कृतापेक्ष आद्या संस्कृतभाषा विविधतापूर्णा आसीत्। शब्दशास्त्रस्य प्रामाणिकः आचार्यः पतञ्जलिः महाभाष्ये पाणिनेः, पाणिनेः पूर्ववर्तिसंस्कृतभाषायाश्च विशालतां वैविध्यञ्चैकेन दृष्टान्तेन व्याजहार। तद्यथा– ''शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमगधेषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु।''[2] शब्दानामेतां वैचित्र्यपूर्णां स्थितिं समीक्षमाणः पाणिनिः स्वाष्टके समेषामेषां शब्दानां साधुत्वप्रतिपादनाय उत्सर्गापवादरूपायाः सूत्ररचनापद्धतेरतिरिक्तं बहुविधविकल्पविधायकपदानां गुम्फनं कारयाञ्चक्रे। ''न वेति विभाषा''।[3] सूत्रे प्रतिषेधविकल्परूपस्य अर्थस्य विभाषा संज्ञां विधाय विभाषापदं परिभाषयन् पाणिनिः सम्भवतः विभाषार्थे प्रयुक्तान् नैकान् पूर्वप्रचलितान् शब्दान् विभाषायाः अर्थे एव स्वरचनायाम् उल्लिलेख। यतो हि–पूर्वाचार्यैर्व्यवह्रियमाणायाः शैल्याः पद्धतेश्च सर्वथा परित्यागः पश्चाद्वर्त्तिभिराचार्यैः सहसा न सम्भवः।

विभाषायाः अर्थे–''विभाषा, वा, अन्यतरस्याम्, प्राचाम्, उदीचाम्, शाकल्यादि–आचार्याणां नामग्रहणम्, एकेषाम्, बहुलम्, उभयथा, विभाषितम्, अपि दृश्यते'' इत्यादीनि बहूनि पदानि पाणिनीयतन्त्रे प्राचुर्येण प्रयुज्यमानानि दरीदृश्यन्ते। भाष्यकारोऽपि नवेति सूत्रस्य प्रत्याख्यानप्रसङ्गे सर्वमेतत् समीक्ष्याह– ''आचार्यः स्वल्वपि संज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं सम्प्रत्याययति बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषामिति''।[4]

विकल्पवाचकपदानां मूर्धाभिषिक्ता उपयोगिता अस्ति यत्– विकल्पार्थपदघटितेन विधिना निष्पाद्यमानौ उभावपि वैकल्पिकसाधुशब्दौ एकस्मिन्नेवार्थे सामान्यरूपेण प्रयोक्तृभिः प्रयोगयोग्यौ भवतः, व्यवस्थितविभाषां परित्यज्य। यतो हि व्यवस्थितविभाषया व्युत्पन्नाः शब्दाः आर्थिकदृष्ट्या न तुल्यौ, किन्तु पर्याप्तरूपेण पृथगेव भवतः। यथा–''विभाषा ग्रहः''[5] अनेन सूत्रेण विकल्पितोऽण्प्रत्ययान्तो ग्राहशब्दो जलचरेऽच्प्रत्ययान्तश्च ग्रहशब्दो ज्योतिषि प्रयुज्येते।सामान्यतः विभाषा त्रिविधा भवति–प्राप्तविभाषा। अप्राप्तविभाषा उभयत्रविभाषा च।

## प्राप्तविभाषा

केनापि विधिसूत्रेण सामान्यरूपेण नित्यप्राप्तेः विधेर्विकल्पनं प्राप्तविभाषा उच्यते। यथा–स्पष्टवाण्याः वाचकानाम् सहोच्चारणे वर्तमानाद् वद्धातोः ''व्यक्तवाचां समुच्चारणे'' इति नित्यमात्मनेपदे प्राप्ते विप्रलापात्मकानां व्यक्तवाचां समुच्चारणे वैकल्पिकरूपेण आत्मनेपदविधानम्। ''विप्रवदन्ते सांवत्सराः, विप्रवदन्ति सांवत्सराः।''[6]

## अप्राप्तविभाषा

केनापि विधिविधायकेन सूत्रेण अविहितां विधिं विकल्पतया विधानम् अप्राप्तप्रकारा विभाषा भवति। यथा–स्वीकरणेऽर्थे वर्तमानाद् यम् धातोः उत्तरम् आत्मनेपदपरकं सिच्प्रत्ययस्य विकल्पेन कित्त्वविधानकरणम्, एका अप्राप्तकोटिका विभाषा विद्यते। ''उपायत कन्याम्, उपायंस्त कन्याम्।''[7]

**उभयत्रविभाषा**

आंशिकरूपेण प्राप्ताम् अप्राप्तां वा विधिं विकल्परूपेण विधानमुभयत्रश्रेणिका विभाषा अस्ति। यथा– वच्यादिसूत्रेण8 श्विधातोः किल्लिटि नित्यं सम्प्रसारणस्य प्राप्तिरपिल्लिटि चाप्राप्तिः। तत्र ''विभाषा श्वेः''[9] इति सूत्रेण सर्वत्र विकल्पनमुभयत्रविधा विभाषा अस्ति। ''शुशाव, शिश्वाय। शुशुवतुः, शिश्वियतुः''।[10]

परम्परायां ''पर्यायशब्दानां लाघवगौरवचर्या नाद्रियते''[11] इत्युक्त्या यद्यपि ''विभाषा, वा, अन्यतरस्याम् इत्यादिपदैः निष्पाद्यमानाः उक्तप्रकारकाः वैकल्पिकाः साधुशब्दाः प्रयोक्तृभिः स्वतन्त्ररूपेण प्रयोक्तुं योग्याः, परम् आधुनिकान्वेषकाणां मते परम्परया विपरीतमेतानि त्रीण्यपि पदानि न पर्यायवाचीनि, अपितु विकल्पत्वेऽपि विभिन्नप्राथमिकताः प्रदर्शयितुमेषां प्रयोगः कृतोऽस्ति। यदि चेदेतेषामनुवादः क्रियेत, तर्हि निम्नप्रकारेण पदान्येतानि निर्वक्तुं शक्यन्ते।

**विभाषा**

नाधिकांशतया, अतिन्यूनतया, प्राथमिकत्वेन न, अल्पांशेनैव।
वा – बाहुल्येन, अधिकांशतया, प्राथमिकतया।

**अन्यतरस्याम्**

उभयथा, यदा–कदा, वैकल्पिकरूपेण एकदा एवम्, अन्यदा एवम्।

कस्या अपि जीवितभाषाया विकल्पप्राथमिकताः बोधयितुमेतत्त्रिधा विभाजनं तस्याः स्वाभाविकरूपं प्रदर्शयितुं सर्वथा क्षमः, पाणिनिश्च स्वनियममाध्यमेन सत्यमेव तदानीन्तनया भाषया न्यायं चकार। कोऽपि नियमो विकल्पेन प्रवृत्तिं लप्स्यत इति बोधयितुं पाणिनिः द्वादशाधिकशतवारं[12] (112) ''विभाषा'' पदं, षडुत्तरशतवारं [13] (106) ''वा'' पदं, त्रिणवतिवारं [14] (93) च अन्यतरस्याम्पदं प्रयुयोज। त्रयाणामप्येतेषां विकल्पबोधकपदानां सूक्ष्मान्तरं दिदृक्षवोऽनुसन्धातारो निम्ननियमान् सावधानेन अवलोकयन्तु। पाणिनेर्नियमः ''वा द्रुहमुहष्णुहष्णिहाम्''[15] इति सूत्रे परिगणितधातूनां हकारस्य वा घकारादेशो भवति झलि पदान्ते च; अत्र घकारस्यानुवृत्तिः ''दधातेर्घः''[16] इत्यस्मात् समायाति। यत्र नित्यमेव घकारादेशो विधीयते। द्रुह्, मुह्, ष्णिह् इति धातूनां हकारस्य वा घकारादेशो विहितः। नियमस्य विनियोगेन प्राप्तरूपाणि, द्रोग्धा, मोग्धा, स्नोग्धा, स्नेग्धा निश्चयेन अधिकं प्रयुज्यन्ते; द्रोढा, मोढा, स्नोढा, स्नेढा अपेक्षया यत्र नियमस्यास्य विनियोगो न विधीयते। एतदेवान्यथा प्रतीयते– ''ऊर्णोतेर्विभाषा''[17], यत्र ऊर्णोतिः विकल्पेन वृद्धिं प्राप्नोति अपेक्षितगुणेन सह,वर्तमानकालिकैकवचने अत्र नियमाविनियोगेन प्राप्तं गुणवद्रूपम् 'ऊर्णोति'। वैदिककालात् लौकिकसाहित्यपर्यन्तमधिकं बाहुल्येन दरीदृश्यते। यत्र हि नियम–विनियोगेन प्राप्तम् ''ऊर्णौति'' रूपम् अल्पमात्रायामेव समस्मिन्नपि लौकिकसाहित्ये प्राप्यते। एतद्धि कारणं दृश्यते यत्पाणिनिः प्रथमविकल्पविधाने ''वा'' (अधिकंशे) पदं प्रयुङ्क्ते। द्वितीये च 'विभाषा' पदं (यथासम्भवं न हि, अथवा अत्यल्पमात्रायामेव)। यत्र चाचार्यः पाणिनिः कामपि प्राथमिकतां प्रदर्शयितुं न वाञ्छति तत्र सः ''अन्यतरस्याम्'' इति पदं प्रयुनक्ति। यथा–''रुहः पोऽन्यतरस्याम्।''[18] इति सूत्रमाध्यमेन रुहधातोर्हकारस्य पकारादेशो विधीयते विकल्पेन णिचि परतः, येन च आरोहयति आरोपयति चेति रूपद्वयम् उपलभ्यते। एतद्दृश्यते यदेतद्रूपद्वयं समानभावेन स्वीक्रियते लौकिकसाहित्ये।

आचार्यः पाणिनिः कियता अवधानेन व्याकरणमतिरिच्य विभिन्नैः कारणैः सूक्ष्मेक्षिकया विकल्पबोधकपदानाम् अर्थान्तरं चित्रणं करोति। व्याकरणमतिरिच्य विभिन्नैः हेतुभिः दृश्यमानानि रूपविशेषाणि सन्ति–प्रान्तीयकारणैः–प्राचाम् (पूर्वदेशीयानां वक्तृतासु); उदीचाम् (उत्तरभारतीयानां संवादेषु; इत्यादीनि। शैलीगतकारणैः–छन्दसि (विदथेषु आप्तकथनेषु वा); भाषायाम्– (दैनन्दिनव्यवहारगत वाक्येषु); सामाजिककारणैः– ''प्रत्यभिवादेऽशूद्रे''[19] शूद्रमतिरिच्य केनाप्यन्येनाभिवादने कृते तस्य प्रत्युत्तरप्रकारविशेषणोत्तरं दातव्यम्, व्यावहारिकैश्च आक्रोशे, कुत्सने एवमेव व्यवर्हतव्यम्। भाषाया एते सूक्ष्मेक्षिकया वर्णिताः यथार्थाः। अत्र एतदध्येयं यत् पूर्वोक्ताः प्राचामित्यादिनियमा अपि विकल्पस्यैव विस्तृते क्षेत्रे समायान्ति।

यदि प्रयत्नपूर्वकः एकः प्रयासः पाणिनेः विकल्पनिर्धारकसूत्राणां व्यवस्थितं तुलनात्मकमध्ययनं साहित्ये प्रयुक्तसंस्कृतपदैः सह क्रियेत चेत् सर्वमेतत् उपर्युक्तनिष्कर्षः सुस्पष्टरूपेण ज्ञातुं शक्यते, इत्यत्र न काचित् विप्रतिपत्तिः।

**संदर्भ ग्रंथ**


1. जैमिनि सूत्र
2. महा॰ पस्पशा॰
3. पा॰ 1.1.44।
4. महा॰ 1.1.44।
5. पा॰ 3.1.143।
6. का॰ 1.3.50।
7. का॰ 1.2.16।
8. पा॰ 6.1.15।
9. पा॰ 6.1.30।
10. का॰ 6.1.30।
11. परिभाषा॰–125।
12. पा. 1.1.26, 1.1.31, 1.2.3, 1.2.16, 1.2.26, 1.3.50, 1.3.77, 1.3.85, 1.4.69, 1.4.97, 2.1.11, 2.3.17, 2.3.25, 2.3.58, 2.4.12, 2.4.16, 2.4.25, 2.4.50, 2.4.78, 3.1.20, 3.1.49, 3.1.113, 3.1.139, 3.1.143, 3.2.114, 3.2.121, 3.3.5, 3.3.50, 3.3.110, 3.3.138, 3.3.143, 3.3.115, 3.3.160, 3.4.24, 4.1.34, 4.2.22, 4.2.117, 4.2.129, 4.2.143, 4.3.13, 4.3.24, 4.4.17, 4.4.113, 5.1.4, 5.1.28, 5.2.4, 5.3.29, 5.3.42, 5.3.68, 5.4.8, 5.4.10, 5.4.15, 5.4.20, 5.4.52, 5.4.72, 5.4.130, 5.4.144, 5.4.149, 6.1.27, 6.1.43, 6.1.50, 6.1.118, 6.1.130, 6.1.175, 6.1.202, 6.1.209, 6.2.67, 6.2.161, 6.2.164, 6.2.196, 6.3.12, 6.3.15, 6.3.23, 6.3.48, 6.3.71, 6.3.87, 6.3.99, 6.3.105, 6.3.131, 6.4.17, 6.4.32, 6.4.43, 6.4.50, 6.4.57, 6.4.137, 6.4.162, 7.1.7, 7.1.69, 7.1.97, 7.2.6, 7.2.15, 7.2.17, 7.2.65, 7.2.68, 7.3.58, 7.3.90, 7.3.115, 7.4.44, 7.4.97, 8.1.27, 8.1.41, 8.1.45, 8.1.50, 8.1.63, 8.2.21, 8.2.93, 8.3.79, 8.4.9, 8.4.18, 8.4.29, पा. 7.3.25, 8.1.53, 8.1.74.
13. पा. 1.1.13, 1.2.23, 1.2.35, 1.3.43, 1.3.90, 1.4.5, 1.4.9, 2.1.17, 2.2.37, 2.3.71, 2.14.55, 2.4.57, 3.1.7, 3.1.31, 3.1.57, 3.1.70, 3.1.94, 3.2.2, 3.2.106, 3.3.14, 3.3.62, 3.3.131, 3.3.141, 3.4.2, 3.4.68, 3.4.83, 3.4.88, 3.4.96, 4.1.38, 4.1.44, 4.1.53, 4.1.82, 4.1.118, 4.1.127, 4.1.131, 4.1.165, 4.2.82, 4.3.30, 4.3.36, 4.3.127, 4.3.138, 4.4.140, 4.3.155, 4.3.162, 4.4.45, 5.1.23, 5.1.35, 5.1.59, 5.1.85, 5.1.121, 5.2.43, 5.2.77, 5.2.93, 5.3.13, 5.3.78, 5.3.93, 5.4.133, 6.1.73, 6.1.89, 6.1.96, 6.1.102, 6.1.145, 6.1.190, 6.2.20, 6.2.171, 6.3.50, 6.3.55, 6.3.81, 6.4.9, 6.4.38, 6.4.81, 6.4.62, 6.4.68, 6.4.80, 6.4.91, 6.4.124, 7.1.16, 7.1.79, 7.1.91, 7.2.27, 7.2.38, 7.2.41, 7.2.44, 7.2.56, 7.3.26, 7.3.70, 7.3.73, 7.3.94, 7.4.6, 7.4.12, 7.4.37, 7.4.81, 8.1.24, 8.2.6, 8.2.33, 8.2.63, 8.2.74, 8.3.2, 8.3.26, 8.3.33, 8.3.36, 8.3.49, 8.3.54, 8.3.69, 8.3.100, 8.3.119, 8.4.10, 8.4.22, 8.4.32, 8.4.44, 8.4.55, 8.4.58.
14. पा. 1.2.21, 1.2.28, 1.2.69, 1.4.44, 1.4.53, 2.2.3, 2.2.21, 2.3.22, 2.3.32, 2.3.34, 2.3.72, 2.4.40, 2.4.44, 2.4.69, 3.1.39, 3.1.41, 3.1.54, 3.1.61, 3.1.75, 3.1.122, 3.4.3, 3.4.32, 4.1.8, 4.1.13, 4.1.24, 4.1.28, 4.1.81, 4.1.91, 4.1.103, 4.1.140, 4.1.159, 4.2.18, 4.2.47, 4.2.104, 4.3.1, 4.3.46, 4.3.64, 4.3.81, 4.4.54, 4.4.56, 4.4.68, 5.1.26, 5.1.52, 5.2.56, 5.2.96, 5.2.109, 5.2.136, 5.3.6, 5.3.21, 5.3.35, 5.3.44, 5.3.64, 5.3.109, 5.4.42, 5.4.105, 5.4.109, 5.4.121, 6.1.38, 6.1.58, 6.1.163, 6.1.171, 6.1.178, 6.1.181, 6.1.188, 6.1.212, 6.2.28, 6.2.29, 6.2.54, 6.2.110, 6.2.169, 6.3.21, 6.3.43, 6.3.58, 6.3.76, 6.3.109, 6.4.45, 6.4.47, 6.4.70, 6.4.93, 6.4.107, 6.4.115, 7.1.35, 7.2.101, 7.3.9, 7.3.39, 7.3.43, 7.4.3, 7.4.15, 7.4.41, 8.1.13, 8.2.54, 8.2.56, 8.3.42, 8.3.85, 8.4.61.
15. पा॰ 8.2.33।
16. 8.2.32।
17. पा॰ 7.3.90।
18. पा॰ 7.3.43।
19. पा॰ 8.2.83।